239

C 27

॥ स्वराङ्कुशः ॥

(ऋग्वेदस्य)

॥ आचार्य-जयन्तस्वामिना पद्यैः रचितः ॥

॥ स टी कः ॥

239
SRI CHAMARAJENDRA SANSKRIT COLLEGE
वाणीं भजत गैर्वाणीं
LIBRARY
FORT, BANGALORE.

॥ आचार्यश्रीसत्यव्रतसामश्रमिणा सम्पादितः ॥

कलिकाता—सत्ययन्त्रे

(१६—१, घोषेस् लेन । सामश्रमिव्ययादितएव)

॥ श्रीमहेन्द्रनाथसरकारेण मुद्रितः प्रकाशितश्च ॥

॥ संवत् १९५१ ॥

॥ अथ ॥

239

॥ स्वराङ्कुशः ॥

॥ श्रीगणेशाय नमः ॥

एकस्मिन् रूप मर्धे हिमकरविषदं स्वर्णवर्णं परस्मिन्,
कण्ठे हारं विषं चा वहति नयनयोः साञ्जनानञ्जनत्वे ।
वक्षः किञ्चित्कपाटाकृति कनकमयाद्री हि किञ्चित्च बिभ्रत्,
कृत्तिं वासश्च लम्बोदरजनक महो तन्महो भावयामः ॥ १ ॥

ऋग्वेदवारणसमावरणैकहेतु-
र्वज्रः स्वराङ्कुश इति प्रथितोऽस्ति तस्य ।
सञ्चारणे निपुणता तदिभारुरुचोः
सञ्जायता मिम मतः प्रकटीकरोमि ॥ २ ॥

सकलदेवेष्वसाधारणां भक्तिं कुर्वाणो ग्रन्थारम्भे विघ्नविघातय शिष्टाचारपरिप्राप्तं नतिरूपं मङ्गल माचरितु मादौ शिष्यशिक्षायै निबध्नाति—

हेरम्बं चण्डिकां नत्वा शम्भुं सूर्यं हरिं गुरुम् ।
सरस्वतीं कविवरां वक्ष्येऽहं स्वरनिर्णयम् ॥ १ ॥

अहं जयन्तस्वामी स्वरनिर्णयं वक्ष्ये इत्यन्वयः । स्वराणां स्वरेषु स्वरैर्वा निर्णयस्तम् ; स्वरैः कृत्वा संहितापाठस्य निर्णय इति यावत् । कस्मिन् स्वरे परे, कुत्र, कः स्वरो भवतीत्यादिकः ।

किं कृत्वा ? हेरम्बचण्डिकादीन् नत्वा। कविवरा मिति स्वरसत्या विशेषणम्। कविषु कवीनां वा वरो यस्याः सा; कविवरप्रदेति यावत्। 'कविवरान्'-इत्यपि पाठः क्वचित्; तदानीं तु व्याख्यानं भिन्न मेव ॥ १ ॥

ननूक्तेषु पदेषु स्वरास्तिष्ठन्ति, तथैव ते संहिताकाले भविष्यन्ति ; इति कृतं निर्णयेनेत्यत आह—

उदात्तान्निहतः स्वारः स्वरितात्प्रचयो भवेत्।

उदात्तादव्यवहितोत्तरं योऽनुदात्तः, सः स्वरितो भवेत्; स्वरिताच्च यस्तथा, स प्रचयो भवेदित्यर्थः ॥

ननु उदात्तान्निहत इत्यत्र अव्यवहितत्व मुच्यते न वा ? विधिपक्षे "इमं मे गङ्गे"-इत्यादौ गकारादीनां प्रचयत्वं न स्यात्, अन्त्ये दूरस्थस्यानुदात्तस्यापि तत् स्यादिति चेत्, मैवम् ; तत्वतोऽत्र प्रचयातिरिक्तस्वरेण व्यवहितत्वाभावत्वं विवक्षितम्। न चार्द्रर्चयोरपि सुरसन्धिः स्यादिति वाच्यम् ; तस्य पदसन्धेर्व्याप्यत्वात्। तत्र च व्यापकाभावादेव व्याप्याभावः। व्यापकाभावस्तु "सन्धिर्नार्द्रर्चयोर्भवेत्"-इत्यनेन निषेधात्। एतेन "सूर्यम्"—इत्यत्रावग्रहवत् सुरितेऽतस्मिन्नप्यवग्रहे तैरनुदात्तत्वशङ्का प्रत्युक्ता ; तत्र च तदभावस्तु "इतिकरणस्योभयतः सन्धिर्न सुरे"-इत्यादिवाक्येन निषेधादिति स्मर्त्तव्यम्।

ननु कस्मात् सुरितात्परमनुदात्तः प्रचयो भवति, प्राक्तादृक्तादा ? प्रथमे "ते ऽवर्ड्न्त"—इत्यादौ प्रचयत्वं न स्यात्, चरमे "क्व यथ"-इत्यादौ तन्न स्यादिति केचन। अविशेषादुभयस्मात्परं

मिति भवतीति भावः। स्वरितविशेषात्परं य उदात्तः, तस्य प्रचयत्ववारणार्थं निहतइत्येतस्योभयत्रान्वय इति स्मर्त्तव्यम्।

इद मत्रावधेयम्— क्वचिद्वेष्टनकाले ऽनार्षादितिकरणात्परेषा मचराणां व्यंजनानां स्वराणां वोदात्तस्वरितपरत्वे ऽनुदात्तत्वम्; स्वरितस्य चेतिकरणेन सहैकीभावे जाते ततः परेषां तथात्वम्। तेन सत्यानृते, अवपश्यन्, अललाभवन्तीः इत्यादौ वेष्टनकाले न प्रचयत्वापत्तिः। शतक्रतो इत्यादौ वेष्टनकाले तद्वारणार्थं परत्वान्तं विशेषण मिति चावधेयम्।

द्वयदात्तानां पदाना मुत्तरान् पद्यादीन् स्वरविधावसंहितवद्भवन्ति। तेन "नैषा गव्यूतिरपभर्त्तवाउ", "तस्य पन्या मन्वेतवै" —इत्यादौ वेष्टनकाले न दोषः। "अश्वपते"-इत्यादिवारणार्थं षष्ठयन्तं पदविशेषणमिति। तदुक्तम्—

"परिग्रहे त्वनार्षान्तात् तैन वैकाक्षरीकृतात्।
परेषां वा समाचारं व्याड़िस्तौ चेत् स्वरौ परौ॥"-इति।

उक्तञ्च—"पद्यादीसु द्वयदात्ताना मसंहितवदुदात्तान्"-इति॥

ननु "स नो रांधास्याभर", "कुविदङ्ग प्रति यथा चित्"-इत्यादौ च 'नो'-'चित्'-इत्येतौ स्वरितप्रचयौस्तः; उक्तलक्षणसत्त्वादित्यत आह—

उदात्तात् स्वरितात् पूर्वो नान्य मापद्यते स्वरम्॥२॥

उदात्तादव्यवहितपूर्वो यः स्वरः, स्वरितश्च यस्तथा, सः स्वरितता प्रचयतां वा न प्राप्नोतीत्यर्थः। यद्वा, निहत इत्यस्य अत्राप्यन्वयः। अग्निमीळे पुरोहित मित्यादि।

नन्वेवं अहन्यन्यमित्यादौ कम्पो न स्यात्; उदात्तात् पूर्वं स्वरितप्राप्तेरभावात्,-- कम्पस्य तु स्वरितविशेषस्योदात्ते परे विधानादिति चेत्, 'उदात्तान्निहतः'-इत्यनेन यौ स्वरित-प्रचयौ विहितौ तावुदात्ते स्वरिते वा परे न स्त इति यावत्। तेन नोक्तकम्पानुपपत्तिरिति भावः। अव्यवहितपदङ्कत्वन्तु प्राग्वद् बोध्यम् ॥ २ ॥

जात्यसंज्ञं स्वरितभेद माह--

व्यञ्जनैस्तु यवौ यत्र प्रयुज्येते ततः परम्।
अपूर्वो नीचपूर्वो वा जात्यः स्वारः स उच्यते ॥ ३ ॥

न विद्यते पूर्वो यस्य स तथोक्तः, नीचः पूर्वो यस्य स तथोक्तः; अनुदात्तपूर्व इति यावत्। तथाच ककारादिव्यञ्जनैः परं यत्र तैः सह यवौ प्रयुज्येते, तत्र अपूर्वो नीचपूर्वो वा सः स्वरितः जात्यसंज्ञक इत्यर्थः। ततः पर मित्यनेन क्रियेत्यादिना श्रुतिचोदितम् क्रियूथ्येत्यादि ॥

अत्र पूर्वार्द्धस्य प्रयोजनञ्चिन्त्यम्। यद्यपि 'ते ऽवर्द्धन्त'-'ब्राह्मणोऽस्य'-इतेतयोरप्यभिनिहतयोः संहिताया मपूर्वत्वनीचपूर्वत्वेन च जात्यत्वं स्यात्, तद्वारणार्थं यवौ प्रयुज्येतेति वाच्यम्? प्रकृते तदभावान्न दोषः। एव मपि "दिवीव चक्षुराततम्"—इत्यादिप्रश्लिष्टोऽपि जात्यः स्यात्? न चेष्टापत्तिः; उवटादिभिस्तस्य प्रश्लिष्टत्वेनोदाहृतत्वाद् ग्रन्थविरोधापत्तेः। तद्वारणार्थं व्यञ्जनैरिति; तत्र च तन्नास्तीति सर्वं चतुरस्रम्। तथापि "व्यख्खा वसुविदम्", "योजान्विन्द्र ते हरी"-इत्यादौ सोऽपि

जात्यः स्यादिति तद्वारणार्थं किञ्चिदुक्तव्यम्, एवञ्चेत् तदेवास्तु किं तेनेति। वस्तुतस्तु प्राक्तनपूर्वनीचपूर्वयोरेव जात्यत्वम् यवयोरिति तात्पर्यम्। एतेन "ते ऽवर्द्धन्त"-इत्यादिकं दूषणं मलग्नकं बोध्यम्। यद्वा तत्स्वरूपकथनमात्रं बोध्यम् ॥ ३ ॥

अन्यमपि स्वरितभेदं माह—

एदोतोरुच्चयोर्यश्च नीचोऽकारः परो यदि।
एकीभावो भवेत्तत्र स्वरोऽभिनिहितस्तथा ॥ ४ ॥

तपरग्रहणादेकारोकारयोरुदात्तयोः सतोस्ताभ्यां परो यदकारोऽनुदात्तो भवेत्, तयोरेकीभावे जाते सत्यभिनिहितसंज्ञः स्वरो भवतीत्यर्थः। एकीभावः पूर्वरूपम्। तथाहि द्वितीयः स्वरितभेद इत्यर्थः। ते ऽवर्द्धन्त, स्वतवसः, ब्राह्मणोऽस्य मुख मासीत् इत्यादि।

यद्यपि पूर्वरूपान्यथानुपपत्त्यैवैदोतोरित्यस्याकारः पर इत्यत्र प्राप्तिः, तथापि स्पष्टार्थं मुक्तं वेदितव्यम्। यद्वा, एकीभावः सन्धिमात्रम्। तथाचैदोतोरित्यस्याकारः पर इत्यस्य च नानतिप्रयोजकत्वम्। अकारः पर इत्यनुक्तौ तु "यज्ञतेन"-इत्यादावप्युक्तलक्षणसत्त्वादभिनिहतः स्यात्। एदोतोरित्यनुक्तौ तु "इन्द्रः सर्पिरासुतिः"-इत्यर्थ मभिनिहितः स्यात्। उभयस्यानुक्तौ तु स्फुट एव दोष इति बोध्यम्।

न चात्रैकीभाव इति व्यर्थम्; "ये अग्ने परिजज्ञिरे"-इत्यादावपि स्यात्। नापि नीच इति व्यर्थम्; "वेदा यो वीनाम्", "वयन्ति समरे ऽतमानः"-इत्यादावपि स्यात्। नाप्युच्चयोरिति

निरर्थकम् ; "अग्निं राये पुरुमीळ्ह श्रुतं नरोऽग्निं सुदीतं ये"-इत्यादावपि स्यात्। अत्र पूर्ववदेकारौकाराभ्यां परस्मिन्नकारे व्यवहितत्वं नोच्यते ; "एङः पदान्तादति"-इत्यनेन व्यवहिते पूर्वरूपप्राप्तेरभावादिति स्मर्त्तव्यम् ॥ ४ ॥

अन्यमपि स्वरित भेद माह—

इउस्थाने यवौ यत्र जायेते उच्चयोस्तयोः।
ताभ्या मुत्तरतरः स्यारः चैत्र इत्यभिधीयते ॥५॥

उच्चसम्बन्धिनोः इकारोकारयोः स्थाने यत्र यकारवकारौ जायेते, ताभ्या मुत्तरतरः चैत्रसंज्ञकः स्वरितोऽभिधीयत इत्यर्थः। श्रुष्ट्यग्ने नवस्य मे, यदिन्द्र चित्र पृथिवीत्यादि। अत्र न च तयोरित्युच्चयोर्विशेषणं तच्छब्दस्य पूर्वपरामर्शित्वे पूर्वमभिनिहिते पूर्वस्यापवादात्तत्पूर्वत्वं व्यर्थ मिति वाच्यम्; "वि ह्यख्यं मनसा", "विद्यामेषि रजः पृथ्वहा"-इत्यादावपि चैत्रः स्यात्। ननु इकारस्थाने यकार इतग्रादि किमर्थम्,—सन्धिमात्र मवास्ता मिति चेत्, न ; एवं सति "अधा दीन्द्र गिर्वणः"-इत्यादिः प्रश्लिष्टोऽपि चैत्रः स्यात्,—तथाच प्रश्लिष्टोच्छेद एव स्यात्। इष्टतो दूषणं पूर्वोक्तदिशा अवसेयम्। तस्मात् "इको यणचि"-इतेयतत्सूत्रचोदित एव सन्धिः सूचते यवावित्यनेनेति द्रष्टव्यम्। एतेन इकारउकारयोराकरे ह्रस्वयोर्ग्रहणात् ह्रस्वेकारोकारयोरेव स्थाने यत्र यकारवकारौ भवतः, तत्रैव चैत्रो भवति नान्यत्रेत्यपि परास्तम्। किञ्च तयोरित्येतस्य पूर्वपरामर्शात्पूर्व मभिनिहिते नीचाकारपूर्वत्व मुदात्तस्थानम् ; तथैवात्रानीचाकारे यत्रेकारोकारयोः स्थाने यकारवकारौ भवतस्तत्रैव चैत्रो नान्यत्रेति।

ननु ह्रस्वग्रहणं किमर्थम्, दीर्घग्रहणं कर्त्तव्य मिति चेत्, तर्हि विपरीतं प्रतिपदेरत; समाधानस्योभयोस्तुल्यत्वात्। वस्तुतस्तु ग्रन्थकर्तुरिच्छैव नियामिकेति भावः। प्रथमोपस्थितस्य ह्रस्वस्य त्यागे प्रमाणाभावाच्च। यद्वा उत्तरत इत्यस्य नीच इत्यर्थः॥ क्वचित्पुस्तके— "इउवर्णौ यदोदात्तावापदेरते यवौ क्वचित्। ताभ्यां नीचः परः स्वारः क्षैप्र इत्यभिधीयते॥"—इति पाठः। सुगम एव॥ ५॥

अन्यमपि स्वरितभेद माह—

इकार उच्चः पूर्वस्मिन् परस्मिन्निहतः स च।
प्रश्लिष्ट माहुराचार्याः स्वरं वर्णविदस्तथा॥६॥

पूर्व इकार उदात्तः, ततः परं स च इकारोऽनुदात्तः; तं मनुदात्तं वर्णविदः आचार्याः प्रश्लिष्टनामकं स्वर माहुरित्यर्थः। वर्णान्विदन्ति ते वर्णविदः। तथा शब्दार्थः पूर्ववत्। "अधा ह्योन्द्र गिर्वणः"-इत्यादि। अत्राकारे ह्रस्वादेशादिकारद्वयं ह्रस्व-मेव बोद्धव्यम्। ततः "सद्यो जज्ञानो वि ह्यो मिद्धो"-इत्यादौ न प्रश्लिष्टापत्तिः।

ननु इ-उ-स्थाने यवौ इत्यत्र यद्यप्याकारे ह्रस्वग्रहणम्, तथा ह्रस्वदीर्घोभयसाधारणविकारौ ग्राह्यावित्युक्तम्, "इको-यणचि"-इतेरतस्सूत्रस्योभयप्राप्तेरिति चेत्, सत्यम्! अत्र तु "सद्यो जज्ञानो वि ह्यो मिद्धो"-इत्यादुदाहरणानुरोधेनेकारद्वयं ह्रस्व मेवोच्यते। अन्यथा तद्दोषस्य तादवस्थ्यं स्यात्। तदुक्तम् —"इकारोकारयोश्च प्रश्लेषः"-इतिशौनकाचार्यश्लोकव्याख्यायां

ह्रस्वयोरिकारोकारयोः प्रश्लेष इति। तत्रापि तदेव प्रत्युदाहरणं दर्शितम्।

ननु उदात्तः प्रथम इकारो द्वितीयोऽनुदात्त इति किमर्थम्,— वैपरित्यं कुतो नेति चेत्, तत्राहुः,— नैषो आसीदित्यादौ, अधाहीन्द्र गिर्वण इत्यादौ च लक्ष्येऽलक्ष्ये च सम्भवासम्भावौ स्याताम्। तत्राप्युभयोरिकारयोरव्यवधानं बोध्यम्। तेन न पूर्वोक्तदोषः।

यद्वा, इकार इति सप्तम्यन्तस्यार्थः। तथा पूर्वस्मिन्निकारे उदात्तः स्वरः, परस्मिन्निकारे तु स्वरोऽनुदात्तः, त मनुदात्तं प्रश्लिष्टनामकं स्वरित माहुरित्यर्थः। यदा पूर्वस्मिन् पदे इकार उदात्तः, परस्मिन् पदे स च इकारोऽनुदात्तः, त मनुदात्तं प्रश्लिष्टं स्वरित माहुरित्यर्थः। अतएव प्रश्लिष्टोऽयं स्वरित इति सङ्गच्छते। प्रश्लेषस्तु न सम्बन्धमात्रं किन्तु प्रकर्षेण श्लेषः प्रश्लेषः, प्रकर्षेण सम्बन्ध इति यावत्। प्रकर्षत्वञ्च "अकः सवर्णे दीर्घः" -इत्येतत् सूत्रकृतम्; अन्यथा "इन्द्राग्नी अपादियम्"--इत्यादाविन्द्राग्नीत्येतस्मिन् प्रथमे पदे इकार उदात्तो वर्त्तते, ततः पर मिति द्वतीयपदे इकारोऽनुदात्तो वर्त्तते, तत्रापुग्भाभ्यां स्वरितः स्यात्; यथाकथञ्चित्स्वरपूर्वकत्वादिरूपसम्बन्धस्य विद्यमानत्वादिति दिक् ॥ ६ ॥

इदानीं चतुर्णां स्वराणां कम्पनिमित्त माह—

कम्पन्तेते च चत्वारो यत्रोच्चस्वरिताः पराः।
एतत् सम्यक्प्रकारेण ज्ञात्वासौ कम्प विज्ञवेत् ॥७॥

चकारस्त्वेवकारार्थः। तथाच त एवोक्ताश्चत्वारः स्वरिताः कम्पन्ते, उच्चारणविशेषं प्राप्नुवन्तीत्यर्थः। उच्चारणविशेषस्त्व-

कारण एवाग्रे स्फुटोभविष्यतीति स्मर्त्तव्यम्। तत्र यस्यां संहितायां क्रियमाणाया मुच्चस्वरिता बहुत्वतः परा भवन्ति, तत्रैव कम्पो भवतीत्यर्थः। उच्चाश्च स्वरिताश्चोच्चस्वरिताः। बहुवचनं तूदाहरणाभिप्रायेणेति भावः। क्क१त्या, कन्या३वाः, योरायो३वनिः, अहन्य१न्यम्, मोष१द्य, अभी३द मेक मेक इत्यादि। यस्मिन् स्वरसन्धौ क्रियमाणे चतुर्णां स्वराणा मुदात्तस्वरिता परा भवन्ति, तत्रैव कम्पो नान्यत्रेत्यर्थः। अनुकम्पनिमित्तभूतसंशयादिरपि कम्पज्ञातुः स्यादित्यत आह— एतदिति। एतत् पूर्वोक्तानां चतुर्णां स्वराणा मुदात्तपूर्वत्वम्। सम्यक् च तत् प्रकारं तद्वदिति। तत्प्रकारेण ज्ञात्वा असौ पाठकजनः कम्पवित्। कम्पं वेत्तेऽसौ कम्पवित्। कम्पज्ञो भवेदित्यर्थः। ज्ञानन्तु -- रूपं बोध्यम्। न त्वेतदित्यस्य कम्पनिमित्तमात्र मर्थः। कम्पनिमित्तस्योदात्तस्य स्वरितस्य वा ज्ञानेऽपि, तत्पूर्वोक्तानां चतुर्णां स्वराणा मज्ञानेऽपि कम्पज्ञाता स्यात्। वस्तुतस्तु स्वरिताना मुदात्तपरत्वेन स्वरितपरत्वेन वा ज्ञान कारण मिति भावः ॥ ७ ॥

इदानीं तैरोव्यञ्जनसंज्ञया स्वरितभेद माह—

उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत्।
एष सर्वबहुः स्वारस्तैरोव्यञ्जन * एव च ॥ ८ ॥

च पुनः, छन्दसि वेदे, उदात्तः पूर्वो यस्य तत्तथोक्तम्, एतादृशं यत्किञ्चिदपि स्वरितं भवेत्, एष तैरोव्यञ्जनसंज्ञ एव स्वरितो भवेदित्यर्थः। सर्वबहुरिति स्वारविशेषणम्। तिरः अन्तर्हितं

* 'सर्वैबहुस्वारैस्तैरोव्यञ्जन'—इति मूलपाठः।

व्यञ्जनं यस्येति तैरोव्यञ्जनः। उदात्तपूर्व मिति जात्यादि-निवृत्त्यर्थम्। विशेषोच्यमाने बहुग्रन्थः स्यादित्येतदर्थं यत्किञ्चि-दिति। मन्त्रादिवाक्यनिवृत्त्यर्थं छदसीति। उदाहरणं तु "अग्नि-मीळे पुरोहितम्" इत्यादूह्यम् ॥ ८ ॥

तिरोविरामसंज्ञं स्वरितभेद माह—

अवग्रहात्परो यत्र स्वरितः स्यादनन्तरः।
तिरोविरामं तं विद्यादुदात्तो यद्यवग्रहः ॥९॥

उदात्तादवग्रहादुत्तरं यदि स्वरितः स्यात्तर्हि तत्स्वरितं तिरोविरामसंज्ञं विद्यादित्यर्थः। अवग्रहशब्देन खण्डन मुच्यते। "विष्कभिते"-इत्यादि। अवग्रहात्पर मिति तैरोव्यञ्जनादिव्यावृ-त्त्यर्थम्। न चोदाहृतोऽपि तैरोव्यञ्जन एव, व्यञ्जनेनान्तर्हितत्वा-दिति वाच्यम्; तिरोविरामस्यावग्रहमात्रविषयत्वात्,— तस्य चान्यत्र साव्काशत्वात्। अतएव बहुरिति विशेषण मपि सङ्गच्छते। उदात्तो यद्यवग्रह इत्येतस्य कृत्यं तु चिन्त्यम्; स्वरूप-कथनमात्रं वा तद् बोध्यम् ॥ ९ ॥

इदानीं पादवृत्तसंज्ञं स्वरितभेद माह—

स्वरे यत् स्वरितो यत्र विवृत्या तत्र संयुतः।
एतत्तु पादवृत्ताख्यं लक्षणं शास्त्रनिश्चितम् ॥१०॥

स्वरितः स्वरो यदि विवृत्या संयुतो भवति, तर्हि तं स्वरितं पादवृत्तं जानीयादित्यर्थः। "य इन्द्र सोमपातमः"। वैवृत्तो ऽय मेवोच्यते; विवृत्तौ भव इति विग्रहात् ॥ १० ॥

जात्यादीना मुदाहरणान्याह—

जात्यः स्वरः सजात्येन, शुष्टाग्नेश्चैप्र उच्यते ।
तेऽवर्द्धताभिनिहितः प्रश्लिष्टो हीन्द्रगिर्वणः ॥११॥
तिरोविरामो विष्कम्भिते तैरोव्यञ्जन उच्यते ।
पादवृत्तस्य त्वेतद्धि क ईंवेद निदर्शनम् ॥ १२ ॥

इद मुपलक्षणम् । क नूनं, यदिन्द्र, ऽब्राह्मणोस्य, स चखान स्वस्तये, पुरोहित मभीत्यादयपि द्रष्टव्यम् । क्वचित् श्लोकानां व्युत्क्रमेण पाठः । स तु 'जात्यः स्वरः सजात्येन'-इत्यादुदाहरण-ग्रन्थस्वरसात्समीचीन एव । न चाय मुदाहरणग्रन्थविरुद्धः पाठो ऽप्रामादिकः ; उपस्थित्यनुरोधेन छन्दोऽनुरोधेन वोदाहरणाना मुक्तत्वात् ॥ ११,१२ ॥

ननु पूर्वस्वरितात्परस्यानुदात्तस्य प्रचयत्व मुक्तम्, तत्र स्वरितात्परानुदात्तस्य यदि स्वरितेन सहैकीभावो भवति, तदा कथं स्वरो भवतीत्यत आह—

नीचेन स्वरितः स्वार मेकीभावे तु गच्छति ।

नीचेनैकीभावे जाते सति स्वरितः स्वरितता मेव प्राप्नोतीत्यर्थः । क्वेयथ क्वेदसीत्यादि । केचित्तु "क्षीरं सर्पिर्मधूदकम्" -इत्युदाहरण मिति वदन्ति । तत्रेदं चिन्त्यम् ; "उदात्तात्स्वरितात्यस्य"-इत्यग्रिमग्रन्थविरोधापत्तेः । एतेन यदुदात्तः स्वरितो वा परभूतो भवति, तदा स्वरितानुदात्ताभ्यां मिलित्वा अनुदात्त एव भवतीति स्मर्त्तव्यम् । तेन "यात्यग्नौ रथीरिव"-इत्यादौ न दोषः इति तिरस्कृतम् ॥

ननु नीचयोरेकीभावे नीचोदात्तयोरेकीभावे स्वरितोदात्तयोः प्रचयोदात्तयोर्वा तथाभावे सति कः स्वरो भवतीत्यत आह—

नीचं नीचैस्त्रिभिश्चोच्च उच्चैस्त्वं त्वधिगच्छति ॥ १३ ॥

नीचेन मिलितो नीचत्व मेव प्राप्नोतीत्यर्थः। चकारस्त्वथार्थः। तथाच स्वरितप्रचयानुदात्तैरपि मिलितो य उच्चः स उदात्त एव भवतीत्यर्थः। "एह्यू षु ब्रवाणि ते", "धेनुर्वागस्मानुपसुष्टुतैतु"-इत्यादि। इद मुपलक्षणम्। उदात्तयोरेकीभावे जाते सति उदात्त एव द्रष्टव्यः। यद्वा; चकारोपलक्षित एवाय मर्थ इति बोध्यम्। अत्र चोदात्तात्परस्यानुदात्तस्य पूर्वोदात्तेन सहैकीभावे जाते स इत्यपि पूर्वोक्ताभिनिहितादृ व्यतिरिक्तस्थल एवोदात्ता भवन्तीति स्मर्त्तव्यम्। तेन "ब्राह्मणोऽस्य"-इत्यादौ न दोषः। ननु नीचेन मिलितो नोच एव भवतीत्युक्तम्, "सजोषसा उषसा सूर्येण चादित्यैर्यातम्"-इत्यत्र नीचाभ्यां चकाराकाराभ्यां मिलितोदात्तस्य दर्शनादिति। तत्तु, अत्र चकारान्तं मिलितं वर्त्तते, स चाकार उदात्तो वर्त्तते; तथाच तेन सह सम्बेर्विद्यमानत्वात् न दोषः। तत्सत्वे च 'सूर्येण चादित्यैश्च यातम्'-इति भाष्ये व्याख्यातम् प्रमाण मिति दिक् ॥ १३ ॥

स्वरितविशेषस्य प्रकृत्या निहितत्व माह—

उदात्तात्स्वरिताद्यस्य स्वरितोदात्तवच्छ्रुतिः।
प्रकृत्या निहितं चाहुराचार्याः स्वरवित्तमाः॥ १४॥

उदात्तवत्प्रचय इत्यर्थः। तथा उदात्तात्परो यः प्रचयः, स प्रकृत्या निहित इत्यर्थः। तत्र निहितस्यैवोत्तरकालं स्वरितता

प्रचयता वा भवतीति भावः। उदाहरणम्—"क्रुणुष्व पाजः प्रसितिं न पृथ्वीम्"-इत्यादूह्यम् ॥ १४ ॥

उदात्तानुदात्तौ स्वतन्त्रौ, ताभ्यां मिलित्वा जायन्ते चैप्रादयः स्वरिताः, तेषा मिदानीं मंशभेदेन पृथग् व्युत्पाद्य कथनं क्रियते—

एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः।
तस्योदात्ततरोदात्तादर्द्धमात्रार्द्ध मेव वा ॥१५॥

यत्रोदात्तानुदात्ताभ्यां मिलित्वा स्वरितो भवति, तत्र तस्य स्वरितोदात्तादुदात्ततरार्द्धमात्रा वेदितव्या। अथवा द्विमात्रस्य स्वरितस्यार्द्ध मेव तथा वेदितव्यम्। इदं तत्र कृत्यम्— अपरो भागोऽनुदात्तस्य सोऽप्युदात्तश्रुतिः, परं तूदात्तं स्वरितं वा अक्षरं चेन्न भवति; यदि तु तत्परं भवति तदा अपरः शेषोऽनुदात्त एव स्यात्। एवं च स एव कम्प इत्युच्यते। तदुक्तं शौनकाचार्यैः— "अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत्।
उदात्तं वोच्चरे किञ्चित् स्वरितं वाक्षरं [illegible] ॥"-इति।

न चैव मुदात्तपूर्वा एव सर्वे कम्पाः स्युः,—तथाच ह्रस्वदीर्घकम्पयोर्भेदो न स्यात्, "मध्ये तु कम्पयेत् कम्पम्"-इत्यादिवचनविरोधश्च स्यात्। तदर्थं मेतद्वचनस्य सर्वत्र ह्रस्व एव विषयः ॥ १५ ॥

सामान्यवचनस्य तु दीर्घविषयविलोपापत्तिभिया अतद्विषयकमपि किञ्चिन्मनसि स्वीकुर्वन्नाह—

यत्राभिनिहितात् पूर्वं मुदात्तस्तु प्रदृश्यते।
तत्र स्वारं प्रकुर्वीत स्थानान्न निदर्शनम् ॥ १६॥

यस्मिन् स्थले ऽभिनिहितात् पूर्वं मुदात्तं प्रदृश्यते, तत्र स्वारं

स्वरितविशेषं कम्प मिति यावत्, प्रकुर्वीत, उदात्तपूर्वक मिति शेषः। न कुर्वीतेत्यपि पाठः। तदा त्वनुदात्तपूर्वक मिति विशेषः। "वृत्तस्य नु ते पुरुहूत वयाः"-"त्वाएहीऽन्द्रावसे"-इत्यादौ तद्वारणार्थं मभिनिहितात् पूर्वं मिति। "यो रायोऽवनिः"-इत्यादौ तद्वारणार्थं मुदात्त इति। निदर्शनम् उदाहरण मित्यर्थः। "रथानां न येऽराः सनाभयः"। अत्र अस्माकं इदं प्रतिभाति।—"रथानां न ये"-इत्यत्र क्रमादिकाले अभिनिहितस्योदात्तपूर्वकत्वाभावाद् अनुदात्तपूर्वः कम्पः स्यादिति। तत्र केचित् संहितामात्रविषयत्व मेतद्वचनस्येति, तन्न; सामान्यवचनस्य तन्मात्रविषयकत्वकल्पने प्रमाणाभावात्। भवतु वा तन्मात्रविषयकत्वम्, तथापि सुतरां तथा स्यात्। अन्ये तु संहिताकाले यस्योदात्तपूर्वकत्वं जातम्, तस्य क्रमादिकाले तथैव। यथा "तनेचेति तनेच"-इत्येते द्वे पदे यत्र पूर्वं भवतस्तत्र लघ्वृक्कारः पठनीय इत्युक्तम्। उदाहरणं तु "अध स्मा यच्छ तन्वेऽतने च च्छर्दिरचित्तम्"-इत्यत्र क्रमकालेऽपि लघ्वृक्कारः पठ्यते। तथा प्रकृतेऽप्युदात्तपूर्व एव क्रमकाले कम्पो भवति। अन्यथा तत्रापि क्रमकाले 'तने'-पूर्वकाभावात्तथा पाठो न स्यात्। तस्मात् संहिताकाले ऽत्रोदात्तपूर्वकत्वदर्शनात् तथैव क्रमेऽपीति न काप्यनुपत्तिः, तदपि विवेकाज्ञाननिबन्धनम्; स्वरविषये तथा कर्तुमशक्यत्वात्। यदि च क्रियते, तदा "इमं मे गङ्गे"-इत्यादौ क्रमादिकाले अनुदात्तपाठो न स्यात्, किन्तु प्रचयपाठः स्यात्; संहिताकाले स्वरितोत्तरत्वात् तत्र प्रचयस्वरस्य जायमानत्वात्। तस्मात् स्वरितविषये नायं नियमः ॥

ननु "शक्रो यथा सुतेषु णः"-इत्यादौ क्रमकाले 'णोरारणत्'-

इति पाठः स्यात्; संहितायां णत्वस्य जायमानत्वादिति चेत्, न; तत्र षकारादयः पाणिनीयव्याकरणेनापि निमित्तत्व मात्राः, तथाच क्रमकाले "निमित्तभावे नैमित्तिकस्याभावः"-इतिन्यायेन न णत्वापत्तिः। यत्र तु यस्य साक्षात् प्रतिशाखे निमित्तत्व मुच्यते, तत्र तेन निमित्तेन जातं यत्कार्यं तत् क्रमादिकाले ऽप्यवस्थित मेवेति नियमः। अत्र बीजं तु क्रमहेतौ द्रष्टव्यम्। विस्तारभयान्नात्र बहु विविच्यत इति बोध्यम्। आदिशब्दार्थं तु ग्रन्थान्तरे विवेचयिष्याम इति दिक् ॥ १६ ॥

इदानीं क्वचित् स्थलविशेषे स्वरो न स्वरते, किन्तु तन्निष्ठो ध्वनिः स्वरत इत्यत आह—

स्वरात्परं व्यञ्जनं यत् परं चेदनुनासिकम्।
पूर्वस्य स्वरते नादो न पूर्वः स्वरते स्वरः ॥ १७ ॥

स्वरात्परं यद् व्यञ्जन मुत्तरकाल मनुनासिकतां प्राप्नोति, ततः पूर्वः स्वरो न स्वारिततां प्राप्नोति, किन्तु तन्निष्ठो ध्वनिरेव तत्त्वं प्राप्नोतीत्यर्थः। ❋ ❋ ❋ ॥ १७ ॥

एतस्यैव श्लोकस्य विवरण माह—

यत्र स्वरात् परो नादः पूर्वस्वरितभाक् स्वरः।
तत्राक्षेपो न कर्त्तव्यो नादेऽङ्गेऽपि तत्परे ॥ १८ ॥

यत्र स्वरात् परो नादो भवति, नादात् पूर्वः स्वरितश्चेत् स्वरो भवति, तदा तस्मिन् स्वरे आकर्षणं न कर्तव्यम्। अचोऽङ्गभूतत्वे ऽपि नादे परे इत्यर्थः ॥ १८ ॥

नन्वस्मिन् स्वरिते ऽन्यङ्कम्मं कुर्यादित्यत आह—

स्वरितस्यानुसारेण कम्मं कुर्वीत शास्त्रवित् ।
ह्रस्वे ह्रस्वं विजानीयाद् दीर्घे दीर्घन्तथैव च ॥ १९ ॥

शास्त्रवित् स्वरितानुरोधेन कम्मं कुर्वीतेत्यर्थः । तथाहि ह्रस्वे-इत्यादिः स्पष्टार्थः ॥ १९ ॥

ननु ह्रस्वः को वा कम्मो ज्ञातव्य इत्यत आह—

स्वरितो निहतङ्गच्छेत्स्वरितो निहतश्च तौ ।
द्विमात्रौ यत्र दृश्येते ह्रस्वकम्मः स उच्यते ॥२०॥

स्वरितपदं जात्यादिस्वरचतुष्टयपरम् । तथाच कम्मनिमित्ते परे स्वरितो निहतं गच्छेत् । स्वरितो निहतश्च तौ यत्र द्विमात्रौ दृश्येते, स ह्रस्वकम्म उच्यत इत्यर्थः । यत्र तु मात्राधिक्यं दृश्यते, स दीर्घकम्म इति भावः ॥ २० ॥

ननु पूर्व मेवैते स्वरा प्रकम्मन्ते इत्युक्तम्, तत्र यद्यप्येतच्छब्दस्य पूर्वपरामर्शाज्जात्यादय एव चत्वारः समायान्ति, तथापीते के ? इत्याकाङ्क्षायां पुनः सिंहावलोकनन्यायेन तस्यैव प्रकारार्थ माह—

जात्योऽभिनिहितश्चैव चैप्रः प्रश्लिष्ट एव च ।
एते स्वराः प्रकम्मन्ते यत्नोच्चैः स्वरितोदयः ॥ २१ ॥

अर्थस्तु पूर्वोक्तदिशा अवसेयः । कम्मस्वरूपं त्वनुपद मेव प्रदर्शितम् ॥ २१ ॥

ग्रन्थेऽन्यकृतत्वभ्रमनिरासार्थम्, क्षेपकश्लोकनिराकरणार्थं च स्वनाम, श्लोकसंख्यां, ग्रन्थनाम, तत्प्रयोजनञ्चाह—

जयन्तस्वामिना प्रोक्तः श्लोकाना मेकविंशतिः ।
स्वराङ्कुशेति व्याख्यातो बह्वृचां स्वरसिद्धये ॥ २२ ॥

स्पष्टार्थः । 'बह्वृचस्वरसिद्धये'-इत्यपि क्वचित् । तदा तु षष्ठी-तत्पुरुषः कर्तव्यः, बह्वृच शब्दश्चाकारान्तो बोध्यः । बह्वृचा आश्वलायना इत्यर्थः । स्वरसिद्धिस्त्वत्र तत्साधनिकरूपेति बोध्यम् ॥२२॥

॥ इति स्वराङ्कुशः समाप्तः ॥

॥ सम्पादकस्याच स्वाभिप्रायज्ञापनम् ॥

—०⊂०—

अथ खल्वयं स्वराङ्कुशो जयन्तस्वामिरचितः । जयन्तस्वाम्यस्माक मन्यत्वापरिचितोऽपि स्यात् स्कन्दस्वामि-भ[illegible]म्याद्दि-समसामयिकः ; स्वामिशब्दान्तनामसाम्यात् । प्राचीनत्वं चास्यावगम्यते ; स्वरशास्त्रत्वेन लक्षणग्रन्थाना मन्यतमत्वात् । इह हि स्वरितभेदादयो विशेषत उपदिष्टाः । व्याख्यातोऽप्ययं सायणपरजेनाप्यनवीनेन केनचित्स्वरशास्त्राभिज्ञेन वेदविदुषा । इह हि 'भाष्ये व्याख्यातम्'-इति (१२ पृ० १६ पं०) सायणभाष्यं किञ्चिदुद्धृतं द्रष्टव्यम् । तेन व्याख्यानेन सहैवाद्य एषोऽदृश्यकल्पः प्रकाश्यते चिरन्दर्शनायेति शम् ॥

कलिकाता.
शाकाः १८१६.

श्रीसत्यव्रतशर्म्मा ।